श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री तिरुमलै अनन्तार्यस्वामि विरचिता

# ॥ श्रीगोदाचतुःश्लोकी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीगोदाचतुःश्लोकी ॥

अखिलात्म गुणावासं अज्ञान तिमिरापहम्।
आश्रितानां सुशरणं वन्देऽनन्तार्य देशिकम्॥

श्रीमद् रामानुजाचार्य श्रीपादांभोरुहद्वयम्।
सदुत्तमाङ्ग सन्तार्यम् अनन्तार्यमहं भजे॥

नित्या भूषा निगमशिरसां निस्समोत्तुङ्गवार्ता
कान्तो यस्याः कचविलुलितैः कामुको माल्यरत्नैः।
सूक्त्या यस्याः श्रुतिसुभगया सुप्रभाता धरित्री
सैषा देवी सकल जननी सिञ्चतां मामपाङ्गैः॥ 1॥

माता चेत्तुलसी पिता यदि तव श्रीविष्णुचित्तो महान्
भ्राता चेद्यतिशेखरः प्रियतमः श्रीरङ्गधामा यदि।
ज्ञातारस्तनयाः त्वदुक्तिसरसस्तन्येन संवर्धिताः
गोदा देवि ! कथं त्वमन्यसुलभा साधारणा श्रीरसि॥ 2॥

कल्पादौ हरिणा स्वयं जनहितं दृष्ट्वैव सर्वात्मनां
प्रोक्तं स्वस्य च कीर्तनं प्रपदनं स्वस्मै प्रसूनार्पणम्।
सर्वेषां प्रकटं विधातुमनिशं श्रीधन्विनव्ये पुरे
जातां वैदिकविष्णुचित्ततनयां गोदामुदारां स्तुमः॥ 3॥

आकूतस्य परिष्क्रियामनुपमामासेचनं चक्षुषोः
आनन्दस्य परंपरामनुगुणामारामशैलेशितुः।

तद्वोर्मध्य किरीटकोटिघटित स्वोच्छिष्ट कस्तूरिका
माल्यामोदसमेधितात्मविभवां गोदामुदारां स्तुमः ॥ 4 ॥

स्वोच्छिष्टमालिकाबन्ध गन्धबन्धुरजिष्णवे।
विष्णुचित्ततनूजायै गोदायै नित्यमङ्गळम् ॥ 5 ॥

मादृशाकिञ्चनत्राण बद्धकङ्कण पाणये।
विष्णुचित्ततनूजायै गोदायै नित्यमङ्गळम् ॥ 6 ॥

श्रीमत्यै विष्णुचित्तार्य मनोनन्दनहेतवे।
नन्दनन्दन सुन्दर्यै गोदायै नित्यमङ्गळम् ॥ 7 ॥

कर्कटे पूर्वफल्गुन्यां तुलसीकाननोद्भवाम्।
पाण्ड्ये विश्वम्भरां गोदां वन्दे श्रीरङ्गनायकीम् ॥ 8 ॥

॥ इति श्रीगोदाचतुःश्लोकी समाप्ता ॥